श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ चतुर्दशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुर्दशः सर्गः ॥

## मन्त्रिभिः सहितस्य रावणस्य यक्षाणामुपर्याक्रमणं तेषां पराजयश्च

ततः स सचिवैः सार्धं षड्भिर्नित्यबलोद्धतः।
महोदरप्रहस्ताभ्यां मारीचशुकसारणैः ॥ **7.14.1** ॥

धूम्राक्षेण च वीरेण नित्यं समरगर्द्धिना।
वृतः सम्प्रययौ श्रीमान् क्रोधाल्लोकान् दहन्निव ॥ **7.14.2** ॥

पुराणि स नदीः शैलान् वनान्युपवनानि च।
अतिक्रम्य मुहूर्तेन कैलासं गिरिमागमत् ॥ **7.14.3** ॥

सन्निविष्टं गिरौ तस्मिन् राक्षसेन्द्रं निशम्य तु।
युद्धेप्सुं तं कृतोत्साहं दुरात्मानं समन्त्रिणम् ॥ **7.14.4** ॥

यक्षा न शेकुः संस्थातुं प्रमुखे तस्य रक्षसः।
राज्ञो भ्रातेति विज्ञाय गता यत्र धनेश्वरः ॥ **7.14.5** ॥

ते गत्वा सर्वमाचख्युर्भ्रातुस्तस्य चिकीर्षितम्।
अनुज्ञाता ययुर्हृष्टा युद्धाय धनदेन ते ॥ **7.14.6** ॥

ततो बलानां सङ्क्षोभो व्यवर्धत इवोदधेः।
तस्य नैर्ऋतराजस्य शैलं सञ्चालयन्निव ॥ **7.14.7** ॥

ततो युद्धं समभवद् यक्षराक्षससङ्कुलम्।
व्यथिताश्चाभवंस्तत्र सचिवा राक्षसस्य ते॥ **7.14.8** ॥

स दृष्ट्वा तादृशं सैन्यं दशग्रीवो निशाचरः।
हर्षनादान् बहून् कृत्वा स क्रोधादभ्यधावत॥ **7.14.9** ॥

ये तु ते राक्षसेन्द्रस्य सचिवा घोरविक्रमाः।
तेषां सहस्रमेकैको यक्षाणां समयोधयत्॥ **7.14.10** ॥

ततो गदाभिर्मुसलैरसिभिः शक्तितोमरैः।
हन्यमानो दशग्रीवस्तत्सैन्यं समगाहत॥ **7.14.11** ॥

स निरुच्छ्वासवत् तत्र वध्यमानो दशाननः।
वर्षद्भिरिव जीमूतैर्धाराभिरवरुध्यत॥ **7.14.12** ॥

न चकार व्यथां चैव यक्षशस्त्रैः समाहतः।
महीधर इवाम्भोदैर्धाराशतसमुक्षितः॥ **7.14.13** ॥

स महात्मा समुद्यम्य कालदण्डोपमां गदाम्।
प्रविवेश ततः सैन्यं नयन् यक्षान् यमक्षयम्॥ **7.14.14** ॥

स कक्षमिव विस्तीर्णं शुष्केन्धनमिवाकुलम्।
वातेनाग्निरिवादीप्तो यक्षसैन्यं ददाह तत्॥ **7.14.15** ॥

तैस्तु तत्र महामात्यैर्महोदरशुकादिभिः।
अल्पावशेषास्ते यक्षाः कृता वातैरिवाम्बुदाः॥ **7.14.16** ॥

केचित् समाहता भग्नाः पतिताः समरे क्षितौ।
ओष्ठांश्च दशनैस्तीक्ष्णैरदशन् कुपिता रणे॥ **7.14.17** ॥

श्रान्ताश्चान्योन्यमालिङ्ग्य भ्रष्टशस्त्रा रणाजिरे।
सीदन्ति च तदा यक्षाः कूला इव जलेन ह॥ **7.14.18** ॥

हतानां गच्छतां स्वर्गं युध्यतामथ धावताम्।
प्रेक्षतामृषिसङ्घानां न बभूवान्तरं दिवि॥ **7.14.19**॥

भग्नांस्तु तान् समालक्ष्य यक्षेन्द्रांस्तु महाबलान्।
धनाध्यक्षो महाबाहुः प्रेषयामास यक्षकान्॥ **7.14.20**॥

एतस्मिन्नन्तरे राम विस्तीर्णबलवाहनः।
प्रेषितो न्यपतद् यक्षो नाम्ना संयोधकण्टकः॥ **7.14.21**॥

तेन चक्रेण मारीचो विष्णुनेव रणे हतः।
पतितो भूतले शैलात् क्षीणपुण्य इव ग्रहः॥ **7.14.22**॥

ससंज्ञस्तु मुहूर्तेन स विश्रम्य निशाचरः।
तं यक्षं योधयामास स च भग्नः प्रदुद्रुवे॥ **7.14.23**॥

ततः काञ्चनचित्राङ्गं वैदूर्यरजतोक्षितम्।
मर्यादां प्रतिहाराणां तोरणान्तरमाविशत्॥ **7.14.24**॥

तं तु राजन् दशग्रीवं प्रविशन्तं निशाचरम्।
सूर्यभानुरिति ख्यातो द्वारपालो न्यवारयत्॥ **7.14.25**॥

स वार्यमाणो यक्षेण प्रविवेश निशाचरः।
यदा तु वारितो राम न व्यतिष्ठत् स राक्षसः॥ **7.14.26**॥

ततस्तोरणमुत्पाट्य तेन यक्षेण ताडितः।
रुधिरं प्रस्रवन् भाति शैलो धातुस्रवैरिव॥ **7.14.27**॥

स शैलशिखराभेण तोरणेन समाहतः।
जगाम न क्षतिं वीरो वरदानात् स्वयम्भुवः॥ **7.14.28**॥

तेनैव तोरणेनाथ यक्षस्तेनाभिताडितः।
नादृश्यत तदा यक्षो भस्मीकृततनुस्तदा॥ **7.14.29**॥

ततः प्रदुद्रुवुः सर्वे दृष्ट्वा रक्षःपराक्रमम्।
ततो नदीर्गुहाश्चैव विविशुर्भयपीडिताः।
त्यक्तप्रहरणाः श्रान्ता विवर्णवदनास्तदा॥ **7.14.30** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चतुर्दशः सर्गः॥